दण्डात् परषड्दण्डात्मकः । इति सार्त्तश्रुतमत्स्य-पुराणम् ॥ एष नियमस्त्विंशद्दण्डदिनाभिप्रायेण न्यूनाधिके न्यूनाधिककालो ज्ञेयः ॥*॥ मध्याह्न-कृत्यं यथा,—

"ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् ।
पुष्पाक्षतं कुशतिलान् गोमयं शुद्धमेव च ॥
नदीषु देवखातेषु तड़ागेषु सरित्सु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
परकीयनिपानेषु न स्नायाद्वै कदाचन ।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा सम्भवे पुनः ॥
मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि ।
अधश्च तिसृभिः कार्य्यं पादौ षड्भिस्तथैव च ॥
मृत्तिका च समुद्दिष्टा त्वार्द्रामलकमात्रिका ।
गोमयस्य प्रमाणन्तत्तेनाङ्गं लेपयेत्ततः ॥
लेपयित्वाथ तीरस्थस्तल्लिङ्गेनैव मन्त्रतः ।
प्रक्षाल्याचम्य विधिवत्ततः स्नायात् समाहितः ॥
अभिमन्त्र्य जलं मन्त्रैस्तल्लिङ्गैर्वारुणैः शुभैः ।
भावपूतस्तदव्यक्तं ध्यायन् वै विष्णुमव्ययम् ॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः ॥
प्रेक्ष्य ओँकारमादित्यं त्रिर्निमज्जेज्जलाशये ।
पुनः पुनरथाचामेत् मन्त्रेणानेन मन्त्रवित् ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् ॥
द्विवारं वा त्रिरभ्यस्येत् व्याहृतिप्रणवान्विताम् ।
सावित्रीं वा जपेद्विद्वांस्तथा चैवाघमर्षणम् ॥
ततः सम्मार्ज्जनं कुर्य्यादापोहिष्ठामयो भुवः ।
इदमापः प्रवहत व्याहृतिभिस्तथैव च ॥
ततोऽभिमन्त्र्य तत् तोयमापोहिष्ठादिमन्त्रकैः ।
अन्तर्ज्जले निरावर्त्त्य सर्व्वपापात् प्रमुच्यते ॥
अपः पाणौ समादाय जप्त्वा वै मार्ज्जने कृते ।
विन्यस्य मूर्द्ध्नि तत्तोयं मुच्यते सर्व्वपातकैः ॥
यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदनम् ॥
अथोपतिष्ठेदादित्यं मूर्द्ध्नि पुष्पान्विताञ्जलिम् ।
प्रक्षिप्यालोकयन्देवमुद्वयं वैदिकैः परम् ॥
उदुत्यं चित्रं देवानामित्यादिभिरनन्यधीः ।
हंसः शुचिषदेतेन सावित्र्या च विशेषतः ॥
अन्यैश्च वैदिकैर्मन्त्रैः सौरैः पापप्रणाशनैः ।
सावित्रीं वै जपेत् पश्चाज्जपयज्ञः स वै स्मृतः ॥
विविधानि पवित्राणि गुह्यविद्यास्तथैव च ।
शतरुद्रियमथर्व्वशिरः सौरमन्त्रांश्च शक्तितः ॥
प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः ।
तिष्ठंश्चेदीक्षमाणोऽर्कं जाप्यं कुर्य्यात् समाहितः ॥
स्फाटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः ।
कर्त्तव्या अक्षमाला वा उत्तरादुत्तमा स्मृता ॥
जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः ।
न कम्पयेच्छिरोग्रीवान्दन्तान्नैव प्रकाशयेत् ॥
गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभम्भयात् ।
एकान्तेषु शुभे देशे तस्माज्जप्यं समाचरेत् ॥
चण्डालाशौचपतितान् दृष्ट्वाचम्य पुनर्ज्जपेत् ।
तैरेव भाषणं कृत्वा स्नात्वा चैव जपेद्बुधः ॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान् मन्त्रान् शक्तितो वै पावमानीस्तु कामतः ॥
यदि स्यात् क्लिन्नवासो वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥
प्रदक्षिणं समावृत्य नमस्कृत्वा ततः क्षितौ ।
आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाचरेत् ॥
ततः सन्तर्पयेद्देवानृषीन् पितृगणान् क्रमात् ।
आदावोङ्कारमुच्चार्य्य नमोऽन्ते तर्पयामि च ॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः ।
तिलोदकैः पितॄन् भक्त्या स्वसूत्रोक्तविधानतः ॥
अन्वारब्धेन सव्येन पाणिना दक्षिणेन च ।
देवर्षींस्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄन् ॥
यज्ञोपवीती देवानां निवीती ऋषितर्पणम् ।
प्राचीनावीती पैत्रे तु स्वेन तीर्थेन भावतः ॥
निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः ।
स्वैर्मन्त्रैरर्चयेद्देवान् पुष्पैः पत्रैरथाम्बुभिः ॥
ब्रह्माणं शङ्करं सूर्य्यं तथैव मधुसूदनम् ।
अन्यांश्चाभिमतान् देवान् भक्त्या चाक्रोधनोऽत्वरः ॥
प्रदद्याद्वाथ पुष्पाणि सूक्तेन पुरुषेण तु ।
आपो वा देवताः सर्व्वास्तेन सम्यक् समर्च्चिताः ॥
नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक् ।
न विष्ण्वाराधनात् पुण्यं विद्यते कर्म्म वैदिकम् ॥
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ।
तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण तु ॥
नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि ।
निवेदयेत् स्वमात्मानं विष्णावमलतेजसि ॥
तदात्मा तन्मनाः शान्तस्तद्विष्णोरितिमन्त्रतः ।
अथवा देवमीशानं भगवन्तं सनातनम् ॥
आराधयेन्महादेवं भावपूतो महेश्वरम् ।
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः ॥
ईशानेनाथवा रुद्रैस्त्र्यम्बकेण समाहितः ।
पुष्पैः पत्रैरथाद्भिश्च चन्दनाद्यैर्महेश्वरम् ॥
अथोनमः शिवायेति मन्त्रेणानेन योजयेत् ।
नमस्कुर्य्यान्महादेवन्ऋतं सत्यमितीश्वरम् ॥
निवेदयीत स्वात्मानं यो ब्रह्माणमितीश्वरे ।
प्रदक्षिणं द्विजः कुर्य्यात् पञ्च ब्रह्माणि वै जपन् ॥
ध्यायेत्तं देवमीशानं व्योममध्यगतं शिवम् ।
अथावलोकयेदर्कं हंसः शुचिषदित्यृचा ॥
कुर्य्यात् पञ्च महायज्ञान् गृहं गत्वा समाहितः ।
देवयज्ञं पितृयज्ञं ऋषियज्ञं तथैव च ॥
मानुष्यं ब्रह्मयज्ञञ्च पञ्चयज्ञान् प्रचक्षते ।
यदि स्यात् तर्पणादर्व्वाक् ब्रह्मयज्ञः कृतो न हि ॥
कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत् ।
अग्नेः पश्चिमतो देशे भूतयज्ञान्त एव वा ॥
कुशासनसमासीनः कुशपाणिः समाहितः ।
शालाग्नौ लौकिकाग्नौ वा जले भूम्यामथापि वा ॥
वैश्वदेवनिमित्तं वै देवयज्ञः स वै स्मृतः ।
यदि स्याल्लौकिके पक्षं ततोऽन्नं तत्र हूयते ॥
शालाग्नौ तत्र देवान्नं विधिरेष सनातनः ।
देवेभ्यश्च हुतान्नाद्यात् शेषान् भूतबलिं हरेत् ॥
भूतयज्ञः स वै ज्ञेयो भूतिदः सर्व्वदेहिनाम् ।
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यो नित्यमेव च ॥
दद्याद्भूमौ बलिं त्वन्नं पक्षिभ्योऽथ द्विजोत्तमः ।
सायं चान्नस्य सिद्धस्य कुर्य्याद्देवमतन्द्रितः ॥
भूतयज्ञः स्वयं नित्यं सायं प्रातर्विधीयते ।
एकन्तु भोजयेद्विप्रं पितॄनुद्दिश्य सत्तमम् ॥
अथवायं यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत् ॥
पूजयेदतिथिं नित्यं नमस्येदर्च्चयेद्द्विजम् ।
मनोवाक्कर्म्मभिः शान्तमागतं स्वगृहन्तु तम् ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुद्ध्या तं परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रं स्यात् तच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥
गोदोहमात्रं कालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम् ।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा ॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति त्वर्थिभ्यो लोभवर्ज्जितः ॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयत् ।
भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन् ॥
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तमाः ।
भुञ्जीत चेत् स मूढात्मा तिर्य्यग्योनिं स गच्छति ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि देवानामर्च्चनं तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्च्चनम् ।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः ।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥"

इति कौर्म्मे उपविभागे १७ अध्यायः ॥

अत्र भोजनविधिर्भोजनशब्दे द्रष्टव्यः ॥

मध्वलः, (मधुं तत्पर्य्यायं चलतीति । चल् + अच् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः ।) मधुपारः । इति शब्दचन्द्रिका ॥

मध्वालु, क्ली, (मधु मधुरं आलु । मधुवन्मिष्टत्वा-त्तथात्वम् ।) मूलविशेषः । मौ आलु इति भाषा ॥ अस्य गुणाः । रक्तपित्तनाशित्वम् । गुरुत्वम् । स्वादुत्वम् । शीतत्वम् । स्तन्यशुक्र-कारित्वञ्च । इति राजवल्लभः ॥

मध्वालुकं, क्ली, (मध्वालु + स्वार्थे कन् ।) कन्द-विशेषः । इति शब्दचन्द्रिका ॥ मौ आलु इति भाषा ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "विदारीकन्दशतावरीविसमृणालशृङ्गाटक-कशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठा-लुकशङ्खालुकरक्तालुकेन्दीवरोत्पलकन्द-प्रभृ-तीनि ॥")

मध्वासवः, पुं, (मधु मधूकपुष्परसस्तेन कृत आसवः ।) मधूकपुष्पकृतमद्यम् । तत्पर्य्यायः ।